आर्तिहर स्तोत्रं

आर्तिहर स्तोत्रं

श्रीशंभो मयि करुणाशिशिरां दृष्टिं दिशन् सुधावृष्टिं |
संतापमपाकुरु मे मंता परमेश तव दयायाः स्यां || 1 ||

अवसीदामि यदार्तिभिरनुगुणमिदमोकसोऽंहसां खलु मे |
तव सन्नवसीदामि यदंतकशासन न तत्तवानुगुणं || 2 ||

देव स्मरंति तव ये तेषां स्मरतोऽपि नार्तिरिति कीर्तिं |
कलयसि शिव पाहीति क्रंदन् सीदाम्यहं किमुचितमिदं || 3 ||

आदिश्याघकृतौ मामंतर्यामिन्नसावघात्मेति |
आर्तिषु मज्जयसे मां किं ब्रूयां तव कृपैकपात्रमहं || 4 ||

मंदाग्रणीरहं तव मयि करुणां घटयितुं विभो नालं |
आक्रष्टुं तांतु बलादलमिह मद्दैन्यमिति समाश्वसिमि || 5 ||

त्वं सर्वज्ञोऽहं पुनरज्ञोऽनीशोऽहमीश्वरस्त्वमसि |
त्वं मयि दोषान् गणयसि किं कथये तुदति किं दया न त्वां || 6 ||

आश्रितमार्ततरं मामुपेक्षसे किमिति शिव न किं दयसे |
श्रितगोप्ता दीनार्तिहृदिति खलु शंसंति जगति संतस्त्वां || 7 ||

प्रहराहरेति वादी फणितमदाख्य इति पालितो भवता |
शिव पाहीति वदोऽहं श्रितो न किं त्वां कथं न पाल्यस्ते || 8 ||

शरणं व्रज शिवमार्तीः स तव हरेदिति सतां गिराऽहं त्वां |
शरणं गतोऽस्मि पालय खलमपि तेष्वीश पक्षपातान्मां || 9 ||

इति श्रीश्रीधरवेंकटेशार्यकृतं आर्तिहरस्तोत्रं |